National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(66): 205-207
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Harapriya Hati**
Bengali Translator,
Bharatiya Bhasha Samiti,
New Delhi

**Correspondence:**
**Dr. Harapriya Hati**
Bengali Translator,
Bharatiya Bhasha Samiti,
New Delhi

# काव्यप्रकशस्य साहित्यदीपिकाटीकायाः तृतीय उल्लासः

**डॉ हरप्रिया हातिः**

**[1]अथ तृतीय उल्लासः**

उल्लाससङ्गतिं [2]प्रतिपादयन् शब्दगतां [3]व्यञ्जकतां प्रतिपाद्येदानीमर्थगतां प्रतिपादयितुमाह।

**अर्थाः [4]प्रोक्ता इत्यादि।** अर्थानां [5]वाच्यलक्ष्यव्यङ्ग्यानां व्यञ्जकता उच्यते, प्रतिपाद्यते [6]बोद्धव्यः प्रतिपाद्य इत्यनेन [7]बुद्धिरत्रान्तर्भूत णिजर्थः इति दर्शयति। यथा [8]एकश्रुतिदूरात्संबुद्धावित्यत्र [9]वाक्यवाच्यसन्निहितोऽन्यसन्निधिर्वाक्यवाच्यान्यसन्निधिः। तस्य [10]वैशिष्ट्यादिति सर्वत्र योज्यम्।

**[11]अइ [12]पिहुलं, इत्यादि।**

अतिपुथुलं जलकुंभं गृहीत्वा [13]समागतास्मि सखि त्वरितम्।
श्रमस्वेदसलिलनिश्वासनिस्सहा विश्राम्यामि [14]क्षणम्।।

**[15]ओण्णिद्दमित्यादि।**

औन्निद्रं [16]दौर्बल्यचिन्तालसत्वं [17]सन्निश्वसितम्।
मम मन्दभाग्यायाः <मन्दभागिन्याः?>* [18]कृते सखि [19]त्वामप्यहह परिभवति।।

**तुहेति** [20]द्वितीया, अमातु मातुवे वेति। [21]वकारात् [22]तुव् तुम् तुह इत्यादेशः। [23]तु हेति द्वितीयान्तः अ मातुमेतु एवेति चकारात्कुम्भः तु हेत्यादेशाः। तुहेति [24]द्वितीयार्थे [25]षष्ठीति केचिदाहुः। तल्लक्षणा परिज्ञानात् न च [26]वाच्यसिध्यङ्गमिति। [27]काक्काक्षिप्तमपि [28]वाच्यसिद्ध्यंगेऽन्तर्भवतीति भावः।

**[29]प्रश्नमात्रेणेत्यादि।** प्रश्नमात्रेण काकौ [30]विश्रान्तायामपि [31]वाच्यार्थः [32]सिद्ध्यत्येव। [33]तथाहि [34]गुरुर्मयि खेदं भजति। [35]**कुरुषु** किं न भजतीति। अत्र मयि खेदो न युक्तः। कुरुषु [36]तु युक्त इति। [37]प्रतीयमान ध्वनित्वायैव कल्पते। [38]अन्येत्वाहुः। [39]कुपितोद्धत नायकप्रयुक्तस्य वाक्यस्य [40]केवलानुवादस्यायुक्तत्वा-द्विधिपर्यवसायित्वमवश्यमङ्गीकर्तव्यम्। [41]तच्च काकुप्रकाश्येनार्थेन विना न [42]सिध्यतीति वाच्य-सिध्यङ्गम्। काकुरिति [43]पूर्वपक्षिणामभिप्रायः। सिद्धान्ते तु [44]गुरोरलंघनीयत्वेन [45]कोपस्याविषयत्वात् प्रश्नमात्रेणापि [46]**वाक्यार्थप्यटनात्** काकोरपि तन्मात्रेण विश्रान्तिसंभवात्। अत्र च तदतिरिक्तस्य योग्यायोग्यरूप-स्यार्थस्य [47]प्रकाशः नात्र तदंगतेति ।।

**[48]तइआ [49]महेत्यादि।**

तदा मम [50]गण्डस्थलनिमितां दृष्टिं [51]**न** [52]नयनस्यन्यतः।
[53]इदानीं सैवाहं तावेव कपोलौ न सा दृष्टिः।।

[54]निमितां निहिताम्। अत्र तदान्या दृष्टिः। इदानीमितरेत्येवं [55]च रूपवाक्यवैशिष्यस्य व्यञ्जकत्वम्।।

णोल्लेइ इत्यादि।

प्रेरयत्यनार्द्रमनाः श्वश्रूर्मां [56]गृहभरे सकले।
[57]क्षणमात्रं यदि सन्ध्यायां केवलं भवति, [58]न वा भवति विश्रामः।।

सुख इत्यादि श्रूयते। समागमिष्यति तव [59]प्रियोऽद्य प्रहरमात्रेण।

एवमेव किमिति [60]तिष्ठसि, तत्सखि सज्जय करणीयम्।।

**अन्यत्रेत्यादि**। [61]अस्मीत्यहमित्यस्मिन्नर्थेऽव्ययम्।

**[62]गुरु अणेत्यादि**।

गुरुजनपरवश [63]प्रिय किं भणामि [64]त्वां मन्दभाग्याहम्।

अद्य प्रवासं व्रजसि व्रज स्वयमेव [65]जानासि करणीयम्।।

**[66]द्वारोपान्तेत्यादि**। [67]प्रोल्लास्य प्रसार्य, [68]परस्परसमासक्तं मिथस्समाश्लिष्टम्। अनेन **[69]**स्पृष्टकाख्यमालिङ्गनमुक्तम्। [70]आनीतमित्यादिना गूढमागच्छेति। अधः क्षिप्तेत्यनेन सूर्येऽस्तमिते आगच्छेति। [71]केचित्तु त्वामुद्दिश्य [72]मदङ्गमेवं कृशमिति [73]ध्वन्यते इत्याहुः। [74]वाचस्तत्यनेन जनकोलाहलरहिते समये साङ्गतवानिति। केचित्तु एतेन पारवश्यं ध्वन्यते **इत्याहुः।** [75]संकोचित इत्यनेनागमन-पारितोषिकमालिंगनं करोतीति व्यज्यते। [76]ननु सर्वेषां [77]प्रायशोऽर्थानामिति द्वितीयोल्लासे अर्थव्यञ्जकत्वं प्रदर्शितम्। किमिदानीमप्याशङ्क्याह।।

**निराकाङ्क्षेत्यादि**। द्वितीये [78]तु सामान्येनोदाहृतम्। अत्र [79]तु वक्त्रादि [80]वैशिष्ट्यरूपेणेति।यद्वा नन्वेकस्मिन्नेवोदाहरणे वक्त्रादिवैशिष्ट्यमपि दर्शयितुं शक्यते। किं [81]पृथगुपादानेनेत्याशंक्याह। [82]निराकाङ्क्षेत्यादि बहुवाक्येनोदाह्रियमाणे प्रतिपत्तिर्निराकाङ्क्षा भवति। अन्यथा सोदाहरणं [83]किं न प्रदर्शितम्। इत्युदारहरणाकाङ्क्षा जायते। अनवसरे [84]संकोचोऽपि युज्यते। [85]सोऽपि नास्तीत्याह।।

**[86]वक्त्रादीनामित्यादि**। [87]वक्तृबोद्धव्यो भयादि**वैशिष्ट्याद्विकादिभेदे द्विकन्त्रिकमित्यादि** भेदे [88]अनेन क्रमेणेति, यथा एकैकवैशिष्ट्याद्व्यञ्जकत्वम्। तथा [89]द्वयत्रयादि वैशिष्ट्यादपीत्यर्थः।।

**[90]अत्ता एत्थेत्यादि।**

श्वश्रूरत्र निषीदति। अत्राहं [91]दिवसं **पश्याम।** पथिकरात्र्यन्धशय्यायाम् [92]आवयोनिर्षत्ससि।।

**सेज्जाए मह णीमज्जाहिसि इति।** सीदतेर्मज्जादेशः। द्विनीक्षुप्रवासिनीति, नैरुत्वम्। अत्र वक्त्रबोध्यव्यवैशिष्यात् मम शय्यायामेव पतेति व्यङ्ग्यम्। एवं [93]त्रिकादिभेदेन ह्यूहनीयम्।

[94]इति भास्करमिश्रविरचितायां काव्यप्रकाशटीकायां साहित्यदीपिकायां तृतीय उल्लासः।।

❖ भा.- महाराष्ट्रराज्यस्य पुणेनगरस्थसर्वकारीयपाण्डुलिपिसंग्रहालयात् भण्डार-करप्राच्यशोधसंस्थानात् (Bhandarkar Oriental Research Institite, Pune) स्वीकृता 109/1919-24 इति सङ्ख्यायुक्ता मातृका **'भा'** इति।

❖ 'मै.' - कर्णाटकराज्यस्य मैसुर इति नगरात् Oriental Research Institute, Mysore ( ORI ) इति मातृकासंग्रहालयात् प्राप्ता मातृका 3302/1 इति संख्यायुक्ता मातृका **'मै.'** इति द्वारा संकेतिता।

❖ 'ग.'—तामिलनाडुराज्यस्य चेन्नैनगरस्थे Government Oriental Manuscripts Library (GOML) इति स्थानात् संगृहीता मातृका 2745 इति संख्यायुक्ता मातृका **'ग.'** इति द्वारा संकेतिता।

**संदर्भः**

1 अथ तृतीय उल्लासः ] ग, भा. ; गणाधिपतये नमः-मै.

2 प्रतिपादयन् ] ग, भा. ; प्रतिपादयति-मै.

3 व्यञ्जकताम् ] भा., मै. ; व्यञ्जनाम्-ग

4 प्रोक्ताः ] ग, भा. ; के प्रोक्ताः-मै.

5 ॰व्यङ्ग्यानाम् ] मै., ॰व्यङ्गानाम्-ग, भा.

6 बोद्धव्यः प्रतिपाद्यः ] ग; बोद्धव्यत्प्रतिपाद्यः-भा., भेदाद्धव्यः प्रतिपाद्य-T2

7 बुद्धिरत्रान्तर्भूतः ] ग; बुद्धप्रांतर्भूतः-भा., बुद्धिरश्रान्तभूतः-मै.

8 एकश्रुति॰ ] ग, भा. ; एकश्रुते॰-मै. पा.सू. 1.2.33.

9 ॰वाच्यसन्निहितः॰] ग; वाच्यसहितः-भा., वाच्यवाक्यसहितोन्य-सन्निद्धिः-मै.

10 वैशिष्ट्यादिति सर्वत्र योज्यम् ] मै.; वैशिष्यात्दिति सर्वत्र योग्यम्-भा., 'ग' मातृकायाम् अयं पाठो लुप्तः।

11 अइ ] ग; अपि-भा., अ इति-मै.

12 पिहुलम् ] भा.; विहुलम्-ग, बहुलमित्यात्यादि-मै.

13 समागतास्मि ] ग, भा. ; समागतान्मे-मै.

14 क्षणम् ] ग, भा. ; क्षनां--- इत्यादि-मै.

15 ओण्णिद्दमित्यादि ] भा.; ओण्णिदं इत्यादि-ग , 'मै.' मातृकायाम् अयं पाठो लुप्तः।

16 दौर्बल्यचिन्ता॰ ] ग; दौबल्यचिन्ता॰-भा. , दौल्बल्यं चिंता-मै.

सन्निश्वसितम् ] ग; सनिश्वसितम्-भा., मन्दभागिन्याः (शु.पा.) ; मन्दभाग्यायाः ] ग, भा.; ममंदभाग्यायाः-मै.

17 कृते सखि ] ग, भा., ते सखि-मै.

18 ॰अहह ] ग; ॰अहरहः-भा. , त्वामप्यह परिभवंते-मै.

19 द्वितीया अमातु मातुवे वेति ] ग, मै., द्वितीयां ताम् अमनुमेतुए-भा.

20 वकारात् ] भा., मै., वाकारात्-ग

21 तुव् तुम् ] ग, मै., उमम्-भा.

22 तु हेति द्वितीयान्तः अ मातुमेतु एवेति चकारात्कुम्भः तु हेत्यादेशाः ] मै.; 'ग', 'भा.' मातृकायाम् अयं पाठो लुप्तः।

23 द्वितीयार्थे ] ग, मै.; द्वितीयाथर्थि-भा.

24 षष्ठीति केचिदाहुः तल्लक्षणा परिज्ञानात् ] ग; षष्ठीति केचित् तल्लक्षणा परिज्ञानात्-भा. , षष्ठांतिते – त् ते लक्षणपरिज्ञानादाहुः-मै.

25 वाच्यसिध्यङ्गमिति ] ग, मै.; वाच्येति-भा.

26 काक्काक्षिप्तमपि ] भा., मै.; काकाक्षिप्तमपि-ग

27 ॰अन्तर्भवतीति ] ग, मै.; ॰भवतीति-भा.

28 प्रश्नमात्रेणेत्यादि ] ग, मै.; प्रश्नमात्रेणेति-भा.

29 विश्रान्तायामपि ] ग, भा.; विश्रान्तावपि-मै.

30 वाच्यार्थः ] भा., मै.; 'ग' मातृकायाम् अयं पाठो लुप्तः।

31 सिद्ध्यत्येव ] ग, मै.; सिद्ध्यत्वेवात्-भा.

32 तथाहि ] ग, भा.; 'मै.' मातृकायाम् अयं पाठो लुप्तः।

33 गुरुर्मयि ] ग, मै.; मयि गुरुः-भा.

34 कुरुषु ] ग, मै.; कुःरुषु-भा.

35 तु ] भा.; 'ग' , 'मै.' मातृकायाम् अयं पाठो लुप्तः।

36 प्रतीयमानः ] ग, मै.; प्रतीयमानाम्-भा.

37 अन्येत्वाहुः ] ग, मै.; अन्येत्वाहु-भा.

38 कुपितोद्धतः ] ग, भा.; कुपितोत्थितः-मै.

39 अवश्यमङ्गीकर्तव्यम् ] ग, मै.; अपश्यांगीकार्यम्-भा.

40 तच्च ] ग, भा.; ततः-मै.

41 सिध्यतीति वाच्यसिध्यङ्गम् ] ग, मै.; सिद्यतीति वाच्यसिद्यंगम्-भा.

42 पूर्वपक्षिणामभिप्रायः ] मै.; पूर्वपक्षिणोऽभिप्रायः -ग, पूर्वपक्षिणो-भिप्रायः-भा.

43 गुरोरलंघनीयत्वेन ] ग; गुरोरनतिलंघनीयत्वेन-भा., मै.

44 कोपस्याविषयत्वात् ] ग; कोपस्याविषयत्वेन-भा., मै.

45 वाक्यार्थप्यटनात् ] ग; वाक्यार्थघटनात्-भा., मै.

46 प्रकाशः नात्र तदंगतेति ] भा., मै.; प्रकाशनान्न तदङ्गता इति-ग

47 तइआ ] ग, मै.; तइया-भा.

48 महेत्यादि ] भा.; इत्यादि-ग, आदिति-मै.

49 गण्डस्थलनिमिताम् ] ग, मै.; गंडस्थलनिर्मिताम्-भा.

50 न ] भा., मै.; 'ग' मातृकायाम् अयं पाठो लुप्तः।

51 नयनस्यन्यतः ] ग, मै.; नयस्यन्यत-भा.

52 इदानीं सैवाहम् ] ग; इदानीसेवाहम्-भा., इदानीं सा चैवाह-मै.

53 निमिताम् ] ग; निर्मिताम्-भा. , निमितां निहिताम्। अत्र तदान्या दृष्टिः। इदानीमितरेत्येवं च रूपवाक्यवैशिष्यस्य व्यञ्जकत्वम्। णोंल्लेइ इत्यादि। प्रेरयत्यनार्द्रमनाः श्वश्रूमाँ गृहभरे सकले क्षणमात्रं यदि सन्ध्यायां केवलं भवति, न वा भवति विश्रामः—इति पाठः 'ग' मातृकायां लुप्तः।

54 च ] भा.; 'ग' मातृकायाम् अयं पाठो लुप्तः।

⌘ णोल्लेइ शु.पा. } णों ल्ले इ इत्यादि ] ग, णोल्ले इति ] भा.

55 गृहभरे ] ग; गृहभारे-भा.

56 क्षणमात्रम् ] ग; क्षणिमात्रम्-भा.

57 न वा भवति विश्रामः। सुख इत्यादि श्रूयते विश्रमः ] ग; विश्रमः मुञ्च ईति श्रूतेयम्-भा.

58 प्रियोद्य ] ग; प्रियोध-भा.

59 तिष्ठसि ] ग, भा.; तिष्ठति-मै.

60 अस्मीत्यहमित्यस्मिन्नर्थेऽव्ययम्] ग; अस्मीत्यहमित्येतस्मिन्नार्थऽ-व्ययम्-भा. ..अस्मीत्यहमित्यत्रार्थेऽव्ययम्- मै.

61 गुरु अणेत्यादि ] ग; गुरु अणेति-भा.' मै.

62 प्रियः ] ग, मै.; प्रय-भा.

63 त्वाम् ] ग, मै.; 'भा.' मातृकायाम् अयं पाठो लुप्तः।

64 जानासि ] ग, भा.; ज्ञास्यसे-मै.

65 द्वारोपान्तेत्यादि ] ग; द्वारापांतेति-भा.' मै.

66 प्रोल्लास्य ] भा.; प्रोल्लस्य-ग' मै.

67 परस्परसमासक्तं मिथस्समाश्लिष्टम्] ग, भा.; परस्परमासक्तं इतरेतरसमाश्लिष्टम्-मै.

68 स्पृष्टकाख्यमालिङ्गनमुक्तम् ] ग; स्पृष्टकमालिंगनमुक्तम्-भा.' मै.

69 आनीतमित्यादिना गूढमागच्छेति ] ग, भा.; अ-पीतमित्यादिना गूढमगच्छेति-मै.

70 केचित्तु ] ग, भा.; केचित्-मै.

71 मदङ्गमेवं कृशमिति ] ग, भा.; मदंगम----- श-मै.

72 ध्वन्यते ] ग, मै.; धन्यते-भा.

73 वाचस्तच्चेत्यनेन जनकलकलरहिते समयसांगतवामिति केचित्व तेन पारवश्यां ध्वन्यात इत्याहुः ] भा.; 'ग' मातृकायाम् अयं पाठो लुप्तः। वाचस्तत्रेत्यनेन --- न कलहलरहिते समये आगंतव्यमिति केचिदनेन पारवश्यं गम्यत इत्याहुः।-मै.

74 संकोचित इत्यनेनागमनपारितोषिकमालिंगनं करोतीति व्यज्यते ] भा.; संकोचिते इति। अनेनागमानतो निवारितोपि काममा-लिङ्गनं करोमीति व्यज्यते-ग, संकोचित इत्यनेन आगमने आलिङ्गनं ते करोमीति व्यज्यते-मै.

75 ननु ] भा., मै.; 'ग' मातृकायाम् अयं पाठो लुप्तः।

76 प्रायशोर्थानामितिद्वितीयोल्लासे अर्थव्यञ्जकत्वं प्रदर्शितम् किमिदानीमप्याशङ्क्याह। ] ग;

77 प्रायश इति द्वितीयोल्लासेर्थस्यव्यंजकत्वं दर्शितं किमदानीम-पीत्या-शंक्याह-भा., प्रायशोऽर्थानां व्यंजकत्वमपीति द्वितीयोल्लासे सर्वस्य व्यजकत्वप्रदर्शितं किमिदानीमित्याशंक्याह-मै.

78 तु ] भा., मै.; 'ग' मातृकायाम् अयं पाठो लुप्तः।

79 तु ] ग, मै.; 'भा.' मातृकायाम् अयं पाठो लुप्तः।

80 वैशिष्ट्यरूपेणेति ] भा.; वैशिष्ट्यरूपेण-ग, वैशिष्ट्येनेति-मै.

81 पृथगुपादानेनेत्याशंक्याह] भा.; इत्याशंपृथगुदाहरणेन-ग, पृथगुदाह-रणेनेत्याह-मै.

82 निराकाङ्क्षेत्यादि बहुवाक्येनोदाह्रियमाणे] ग; निराकांक्षेति पार्थवोतोदा-क्रियमाणे-भा.

83 किम् ] ग, भा.; 'मै.' मातृकायाम् अयं पाठो लुप्तः।

84 संकोचोपि ] ग, मै.; संकरोपि-भा.

85 सोपिनास्तीत्याह ] ग, मै.; न्योपिसोपिनास्तीत्याह-भा.

86 वक्त्रादीनामित्यादि ] ग; वक्त्रादीनामिति-भा., मै.

87 वक्तृबोद्धव्यः ] ग, मै.; वक्तृबोधव्यः-भा.

88 अनेन क्रमेणेति ] ग, मै.; अनेनेति-भा.

89 द्वयत्रयादि ] ग, मै.; द्वयत्रव्य-भा.

90 अं ता एं थेत्यादि ] ग; अत्रा एष्टेति-भा., मै.

91 दिवसं पश्यामः ] ग, मै.; दिवस एव पश्यमा-भा.

92 निषत्ससि ] ग; निषेत्प्यसि-भा., निषेत्स्यति- मै.

93 त्रिकादिभेदह्यूहनीयम् ] ग, मै. ; त्रिकादिभेदह्यम्-भा.

94 इति भास्करमिश्रविरचितायां काव्यप्रकाशटीकायां साहित्यदीपि-कायां तृतीय उल्लासः ] ग; इति साहित्यदीपिकायां तृतीयो-ल्लासः-भा., इति श्रीभास्करमिश्रविरचितायां काव्यप्रकाशटीकायां साहित्य-दीपिकायां तृतीय उल्लासः।- मै.